**अकृष्ण** पु० नास्ति कृष्णः मलो यस्य । निष्कलङ्के चन्द्रे "चन्द्रमा वै ब्रह्माऽकृष्ण" इति श्रुतिः । न०त० । कृष्णत्वविरोधिशुभ्रत्वे पु० । तद्वति, शुद्धे च त्रि० । [पुण्यशीले ।

**अकृष्णकर्म्मन्** त्रि० न कृष्णं शुद्धं कर्म्म यस्य । शुद्धकर्म्मकारिणि

**अकेतु** पु० नास्ति केतुश्चिह्नं यस्य । चिह्नरहिते अज्ञाने, "केतुं कृण्वन्नकेतवे" इति वेदः य० (२९,३७) अकेतवे अज्ञानायेति वेददीपः । चिह्नध्वजाभ्यां रहिते त्रि० ।

**अकौशल** त्रि० न-कुशलः अकुशलस्ततो भवादौ अण् आद्यचो वा न वृद्धिः । अकुशलभवादौ । आद्यचो वा वृद्धौ आकौशलोऽप्यत्र । कुशलस्य भावः अण्+न०त० । असौष्ठवे न० । [कायति कै क वा । मातरि जनन्याम् ।

**अक्का** स्त्री अक-क, अच्यते इत्यक् अन्च-क्विप् गतिः तस्यै

**अक्त** त्रि० अज्यते अन्ज-कर्म्मणि क्त । कृताञ्जने, "अक्तं रिहाणां व्यन्तु वय इति" "अक्ताः शर्करा उपदधातीति" च श्रुतिः परिमिते, व्याप्ते, सङ्कुले च ।

**अक्तु** पु० अन्ज-तु नि० । रात्रौ, तदुपलक्षिते तमसि च "इन्द्रं दिवा वञ्चया रुद्रमक्तौ" इतिवेदः ।

**अक्त्र** न० अन्ज-बा० त्र । वर्म्मणि । [इतिवेदः ।

**अक्र** त्रि० अन्चु गतौ रक् । स्थिरे । "उद् स्वरुर्नवजा नाक्रः"

**अक्रम** त्रि० नास्ति क्रमः परिपाटी पादः क्रमणं वाऽस्य । परिपाटीशून्ये त्यक्तक्रमे एककाले । "तत्त्वार्थक्रियाचारित्वं क्रमाक्रमाभ्यां व्याप्तं न च क्रमाक्रमाभ्यामन्यः प्रकारः समस्तीति" सर्व्व द० पादशून्ये आक्रमणशून्ये च । क्रमभावे घञ् अभावार्थे न०त० । क्रमणाभावे पु० । अव्ययीभावः । क्रमाभावे अव्य० ।

**अक्रान्ता** स्त्री न क्रम्यते स्म कण्टकावृतत्वात् क्रम-क्त न० त० । वृहत्याम् । क्रान्तभिन्ने विष्णुना क्रान्ते च त्रि० ।

**अक्रतु** त्रि० नास्ति क्रतुर्यज्ञः संकल्पोवा यस्य । यज्ञरहिते संकल्परहिते च परमात्मनि पु० "न्यक्रतून्यथिनो मृध्रवाच" इति वेदः ।

**अक्रिया** स्त्री० अभावार्थे न०त० । क्रियाभावे "प्रधानस्याक्रिया यत्र साङ्गं तत् क्रियते पुनः । तदङ्गस्याक्रियायान्तु नावृत्तिर्न च तत्क्रियेति" "अक्रिया त्रिविधा प्रोक्तेति" च स्मृतिः । न०ब० । कर्म्मशून्ये गुणादौ च त्रि० । सर्व्वकर्म्मशून्ये परमात्मनि पु० । [वंश्ये क्षत्रियभेदे पु० ।

**अक्रूर** त्रि० न क्रूरः । क्रूरभिन्ने सरले, स्वनामप्रसिद्धे वृष्णि-

**अक्रोध** पु० न क्रोधः अभावार्थे न०त० । क्रोधाभावे यमभेदे "अहिंसा क्षान्तिरक्रोधः सत्यास्तेयापरिग्रहा" इति पुराणम् । "अक्रोधं शिक्षयन्त्यन्ये क्रोधना ये तपोधना इति नैष० न० व० । क्रोधशून्ये त्रि० ।

**अक्लम** पु० न क्लमः अभावार्थे न०त० । श्रमाभावे । न० ब० । श्रमशून्ये त्रि० ।

**अक्लिष्ट** क्लिश-भावे क्त न०७ब० । क्लेशरहिते कर्म्मादौ । क्लिश-कर्त्तरि क्त न०त० । श्रान्तभिन्ने त्रि० । [शून्ये त्रि० ।

**अक्लेश** पु० अभावार्थे न०त० । क्लेशाभावे । न०ब० । क्लेश-

**अक्ष** व्याप्तौ संहतौ च भ्वा० प० वेट् । अक्षति अक्ष्णोति आक्षीत् आष्टाम् आक्षिष्टाम् आनक्ष । क्त अष्टः क्तिन् अष्टिः शतृ अक्ष्णुवन् इ अक्षि-कनिन् अक्ष ।

**अक्ष** न० अश्नुते व्याप्नोति विषयान् स्ववृत्त्या संयोगेन वा अश-स । इन्द्रिये, "अक्षाणि पण्डितजना विदुरिन्द्रियाणि" उ०नेत्रे, अधोक्षज इति । तुत्थे (तुँते) सौवर्चले च । ज्योतिषोक्ते राशिचक्रावयवभेदे । "शङ्कुर्नरोना कथितः सएव खार्द्धाद्द्रवेर्या विषुवद्दिनार्द्धे । नतिः पलोऽक्षश्च सएव तज्ज्ञैस्तत्रोन्नतिर्यास्य सएव लम्ब इति" सिद्धान्तशिरोमणिगणिताध्यायोक्ते विषुवद्दिनार्द्धे खार्द्धापेक्षया नतिरूपे पलांशभेदे पु० । एतद्विवरणम् भास्कराचार्य्येण प्रमिताक्षरायां स्वयमेव कृतम् । यथा "निरक्षदेशे (लङ्काविभागे) यदेव विषुवन्मण्डलं तदेव सममण्डलं ततः क्षितिजादन्यदुन्मण्डलं नाम वलयं नास्ति तत्र ध्रुवौ च क्षितिजसंस्थे, अथ निरक्षदेशात् द्रष्टा यथा यथा उत्तरतो गच्छति तथा तथा उदक्ध्रुवमुन्नतं पश्यति तथा यैर्भागैर्ध्रुवउन्नतस्तैरेव भागैः अक्षसंज्ञैः खस्वस्तिकात् दक्षिणतोविषुवन्मण्डलं नतं पश्यतीति" । "चन्द्राश्वि १२ निघ्ना पलभाङ्किता च लङ्कावधिः स्यादिह दक्षिणोऽक्ष" इति भास्वती । "उदग्दिशं याति यथा यथा नरस्तथा तथा स्यान्नतमृक्षमण्डलम् । उदग्ध्रुवं पश्यति चोन्नतं क्षितेस्तदन्तरे योजनजाः पलांशका इति सिद्धान्त शि० गोलाध्यायः यदि भूपरिधि (४९६७) योजनैश्चक्रांशाः (३६०) लभ्यन्ते तदापसारयोजनैः किमिति, यद्वृत्तपरिधिना (३६०) भूपरिधिः (४९६७) लभ्यते तदा अक्षांशैः किमिति, त्रैराशिकेन फलं निरक्षदेशलङ्कास्वदेशयोरन्तरयोजनानि स्युरिति, स्वयमेव प्रमिताक्षरायां व्याख्यातम्, तथैव गोलाध्यायोक्तं दर्शितम् । "योजनसंख्या भांशै (३६०) र्गुणिता स्वपरिधि (४९६७) हृता भवन्त्यंशाः (अक्षांशाः) । अक्षांशेभ्यो भूमौ कक्षायां (ऋक्ष ३६० कक्षायाम्) वा योजनानि च व्यस्तमिति" । व्यस्तमिति भूपरिधिगुणिता भांशहृता